नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

**SS—12—Sanskrit Sah.**

No. of Printed Pages — 7

# उच्च माध्यमिक परीक्षा, 2015
# SENIOR SECONDARY EXAMINATION, 2015
# संस्कृत साहित्यम्

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

पूर्णाङ्कः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

## खण्ड - क

1. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत —

अस्मान् परितः यत् वृत्तं आवृणोति तत् पर्यावरणम् इति कथ्यते । तद् द्विविधं प्रकृतिनिर्मितं मानवनिर्मितञ्च । सम्प्रति संसारे औद्योगिकविकासेन समं पर्यावरणप्रदूषणस्य समस्या सम्मुखीना वर्तते । विविधोद्योगैः नवाविष्कारैश्च वायुमण्डलं, जलं च प्रदूषितं संजातम् । जनसंख्या विस्फोटेन, वनानां विनाशेन, वाहनानामपरिमितेन धूमेन, विषमिश्रितरसायनानामुपयोगेन, ध्वनिप्रदूषणेन च सर्वत्र हाहाकारः रोगाः अशान्तिश्च व्याप्ता दृश्यन्ते । अस्याः प्रदूषणसमस्यायाः निवारणाय पर्यावरणसंरक्षणार्थं अस्माभिः सर्वैरेव प्रयत्नः कर्त्तव्यः ।

(i) पर्यावरणं कतिविधम् ? ( एकपदेन उत्तरम् ) 1

(ii) कस्याः निवारणाय अस्माभिः सर्वैरेव प्रयत्नः कर्त्तव्यः ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) ''सम्प्रति संसारे .............. वर्तते ।'' इत्यत्र 'वर्तते' क्रियायाः कर्तृपदं किम् ? 1

2. निम्नलिखितम् अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत —

परेषाम् उपकारः परोपकारोऽस्ति । अन्येभ्यो मनुष्येभ्यो जीवेभ्यो वा तेषां हितसम्पदानार्थं यत् किंचिंद् दीयते, तेषां साहाय्यं वा क्रियते, तत् सर्वं परोपकारशब्देन गृह्यते । संसारे परोपकार एव स गुणो विद्यते, येन मनुष्येषु जीवेषु वा सुखस्य प्रतिष्ठा वर्तते । समाजसेवायाः भावना, देशप्रेमभावना, देशभक्तिः, दीनोद्धरणभावना, परदुःखकातरता सहानुभूत्यादयश्च परोपकार-गुणस्य ग्रहणेनैव भवति । परोपकारकरणेन हृदयं पवित्रं, सत्वभावसमन्वितं सरलं विनयोपेतं सरसं सदयं च भवति । परोपकारिणः परेषां दुःखं स्वीयं दुःखं मत्वा तन्नाशाय प्रयतन्ते । ते दीनेभ्यो दानं ददति, निर्धनेभ्यो धनं, वस्त्रहीनेभ्यो वस्त्रं, पिपासितेभ्यो जलं, बुभुक्षितेभ्योऽन्नं अशिक्षितेभ्यश्च शिक्षां ददति । सज्जनाः परोपकारेणैव प्रसन्नाः भवन्ति । ते परोपकरणे स्वीयं दुःखं न गणयन्ति । परोपकारेण सुखं शान्तिश्च वर्धते ।

(i) अन्येभ्यः मनुष्येभ्यः यत् किंचित् हितसम्पादनार्थं क्रियते तत् किम् ? ( एकपदेन उत्तरम् ) $\frac{1}{2}$

(ii) सज्जनाः केन प्रसन्नाः भवन्ति ? ( एकपदेन उत्तरम् ) $\frac{1}{2}$

(iii) परोपकारकरणेन हृदयं कीदृशं भवति ? ( पूर्णवाक्येन उत्तरम् ) 2

(iv) 'ते दीनेभ्यो दानं ददति ।' इत्यस्मिन् वाक्ये 'ददति' इति क्रियाया: कर्तृपदं किम् ? 1

(v) ते परोपकरणे .................... न गणयन्ति । इत्यत्र 'ते' इति सर्वनामपदं कस्य संज्ञापदस्य स्थाने प्रयुक्तम् अस्ति ? 1

(vi) 'निर्दयम्' इत्यस्य विलोमपदं गद्यांशात् लिखत । 1

(vii) 'स्वीयं दु:खम्' इत्यनयो: विशेषणपदं किम् ? 1

(viii) गद्यांशस्य समुचितं शीर्षकं लिखत । 2

## खण्ड - ख

3. प्रदत्त रूपरेखया कथासंयोजनं करणीयम् — 8

.................. गुरुकुलम् । गुरु: .................... । शिष्य: भवितुम् ...................... । ...................... परीक्षा ...................... । देव: कुत्र ......................... । .................. सर्वत्र ...................... । गुरु: सन्तुष्ट: ....................... । .................... शिष्य: भवति ।

**अथवा**

क्रमरहितानि वाक्यानि समुचित क्रमानुसारं लिखत —

(i) आंग्लसैनिकै: मानगढपर्वत: परित: आक्रान्त: ।

(ii) जना: जागरूका: अभवन् ।

(iii) गोविन्द: गुरु: 'सम्पसभा' इति संस्थाया: स्थापनां कृतवान् ।

(iv) प्रायश: सार्धैक सहस्रं वनवासिन: मृता: ।

(v) आंग्लशासका: रुष्टा: अभवन् ।

(vi) प्रतिवर्षम् एतद् अधिवेशनं भवति स्म ।

(vii) आंग्लसैनिका: जनानाम् उपरि गुलिकाप्रहारं कृतवन्त: ।

(viii) मानगढपर्वतोऽपरि सम्पसभाया: प्रथमम् अधिवेशनम् अभवत् ।

4. प्रदत्तं संकेतानुसारं वर्णनं लिखत — ( 80 शब्दाः ) 4

विनयगुणः, प्रधानः, विनयवान् , सर्वेषां, प्रेमास्पदं, विनयरहितः, अनादृतः, विनयी, प्रतिष्ठां, प्राप्नोति, मानवस्य, महद्भूषणम्, विनयवतः कोऽपि शत्रुः न, शान्त्यै, समृद्धये, विनयस्य महती, आवश्यकता ।

**अथवा**

प्रातःकालम् , रमणीयं, दृश्यम् , वातावरणं विशुद्धम् , शीतलवायुः, सूर्योदयः, रम्यः, सर्वत्र प्रकाशः, पुष्पाणि विकसन्ति, मधुरं भ्रमरगुञ्जनम् , खगाः गीतं, प्रातः, भ्रमणं, अतीव हितकरं, केचन व्यायामं, क्रीडनं, स्व स्व कार्यं कुर्वन्ति ।

**खण्ड - ग**

5. अधोलिखितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत —

तदतिकुटिल चेष्टादारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि च यौवने कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न वञ्च्यसे धूर्तैः, न विडम्ब्यसे लक्ष्म्या, नाक्षिप्यसे विषयैः नापह्रियसे सुखेन । इदमेव च पुनः पुनरभिधीयसे — विद्वांसमपि, सचेतसमपि, महासत्वमपि, अभिजातमपि, धीरमपि, प्रयत्नवन्तमपि पुरुषं दुर्विनीता खलीकरोति लक्ष्मीरित्येतावदिभिधायोपशशाम ।

(i) अभिजातमपि पुरुषं का खलीकरोति ? ( एकपदेन उत्तरम् ) 1

(ii) इदमेव च पुनः पुनः कस्मै अभिधीयते ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) 'अस्मिन् .................. च यौवने कुमार ! तथा प्रयतेथाः' इत्यत्र विशेषणपदेन अन्वितिं कुरुत । 1

(iv) ''विद्वांसमपि ................ उपशशाम ।'' इत्यत्र 'लक्ष्मीः' इति कर्तुः क्रियापदं किम् ? 1

6. अधोनिर्दिष्टं पद्यं पठित्वा प्रश्नानामुत्तराणि लिखत —

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान् ,
प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ॥

(i) प्रोद्दीप्ते भवने कं प्रति उद्यमः नोचितः ? ( एकपदेन उत्तरम् ) 1

(ii) कस्मिन् विदुषा महान् प्रयत्नः कार्यः ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) ''यावत् स्वस्थं ................. कलेवरगृहम् ।'' उचितपदेन अन्वितिं कुरुत । 1

(iv) ''वृद्धावस्था'' इति पदस्य कः पर्यायः अत्र ? 1

7. निम्नांकितं नाट्यांशं सम्पठ्य प्रश्नानामुत्तराणि लिखत —

अरुन्धती: — एहि वत्स ! ( लवमुत्सङ्गे गृहीत्वा आत्मगतम् ) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।

कौशल्या: — जात ! इतोऽपि तावदेहि । ( उत्सङ्गे गृहीत्वा ) अहो, न केवलं मांसलोज्ज्वलेन देहबन्धेन, कलहंसघोषघर्घरानुनादिना स्वरेण च रामभद्रमनुसरति । जात ! पश्यामि ते मुखपुण्डरीकम् । ( चिबुकमुन्नमय्य, निरूप्य, सवाष्पाकूतम् ) राजर्षे किं न पश्यसि ? निपुणं निरुप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव ।

जनक: — पश्यामि, सखि पश्यामि । ( निरुप्य )

(i) कौशल्या कस्य मुखपुण्डरीकं पश्यति ? ( एकपदेन उत्तरम् ) 1

(ii) लवं कस्मिन् गृहीत्वा अरुन्धत्याः मनोरथः पूरितः ? ( पूर्णवाक्येन उत्तरम् ) 1

(iii) 'घर्घरानुनादिना स्वरेण च रामभद्रमनुसरति' इत्यत्र विशेष्यपदं किम् ? 1

(iv) ''न केवलं मांसलोज्ज्वलेन .................. रामभद्रमनुसरति ।'' इत्यस्मिन् वाक्ये कर्तृक्रियापदयोः चयनं कुरुत । 1

8. निम्नलिखितशब्दयोः हिन्दीभाषायाम् आङ्लभाषायां वा अर्थं लिखत — 1 + 1 = 2

(i) नीडेषु

(ii) जहाति ।

9. रेखांकित पदानि आधृत्य प्रश्न निर्माणं कुरुत — 1 + 1 + 1 + 1 = 4

(i) मानवः विद्यया <u>अमृतम्</u> अश्नुते ।

(ii) निर्गलिताम्बुगर्भं शरद्धनं <u>चातको</u>ऽपि नार्दति ।

(iii) <u>दूरस्थितानां</u> मैत्री नश्यति ।

(iv) <u>भगवद्वाक्यानि</u> समाप्तानि न भवन्ति ।

10. निम्नांकितवाक्ययोः भावार्थः हिन्दीभाषायाम् , आङ्लभाषायां संस्कृते वा लेख्यः — 2 + 2 = 4

(i) देहं वा पातयेयं कार्यं वा साधयेयम् ।

(ii) लक्ष्मीः स्वयं वाञ्छति वासहेतोः ।

11. अधोलिखितस्य श्लोकस्य अन्वयं लिखत — 2

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।

भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥

12. निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत —

(i) ''यद्यदाचरति श्रेष्ठ: ।'' इत्यस्मिन् कर्तृक्रियापदयो: चयनं कुरुत । 2

(ii) ''विगुण: कार्षापण: कदाचिद् उपयुक्तो भवेत् ।'' इत्यत्र विशेषणं किम् ? 1

(iii) पशुहत्या तु तेषाम् आक्रीडनम् । इत्यत्र रेखांकितपदस्य स्थाने संज्ञापदस्य प्रयोगं कृत्वा वाक्यं पुन: लिखत । 1

(iv) 'कदाचित्ताभ्यां त्वं विस्मृत: स्यात् ।' इत्यत्र सर्वनामपदचयनं कुरुत । 1

(v) ''एकस्मिन् दिने श्रीनायार: पत्रमेकं धृत्वा मस्तकमवनमय्य पठन् आसीत् ।'' इत्यत्र रेखांकितपदस्य पर्यायबोधकं पदं लिखत । 1

(vi) मयानुभूतमस्ति यदयं कुटिल: किन्तु नानादेशेषु नानारूपाणि सन्धार्य गुप्तं विचरति । इत्यत्र रेखांकितपदस्य विलोमार्थकं पदं लिखत । 1

(vii) ''तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सकुं मे ।'' इत्येतत् वाक्यं क: कस्मै कथयति ? 1

13. ईशावास्योपनिषदि कति मन्त्रा: सन्ति ? 1

14. कालिदासाय क: अलंकार: प्रिय: वर्तते ? 1

15. अर्थगौरवाय क: कवि: प्रसिद्ध: अस्ति ? 1

16. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते ? 1

17. महाकविभवभूतिना विरचितं नाटकद्वयं लिखत । 2

18. हृषीकेशभट्टाचार्यस्य गद्यरचना का अस्ति ? 1

19. भट्टमथुरानाथशास्त्रिणा जयपुर नगरमाधृत्य रचितरचनाद्वयम् लिखत । 1

## खण्ड - घ

20. (i) त्रिलघुः कः गणः भवति ? 1

(ii) प्रतिचरणं सप्तदशवर्णाः कस्मिन् छन्दसि भवन्ति ? 1

21. अधोलिखितेषु कयोश्चिद् **द्वयोः** लक्षणोदाहरणे लिखत — $\frac{1}{2} + 1 + 1\frac{1}{2} = 3$

(i) वसन्ततिलका

(ii) मालिनी

(iii) उपजाति ।

22. निम्नलिखित पंक्तिषु छन्दसः नामोल्लेखं कुरुत — $1 + 1 + 1 = 3$

(i) पादपैस्थैश्च मारुतः ।

(ii) मनो मे संमोहस्थिरमपि हरत्येष बलवान् ।

(iii) सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ ।

23. पदसमुदायेन यत्र अनेकार्थकथनं भवति तत्र कोऽलंकारः ? तस्य परिभाषापि लेख्या । $1 + 1 = 2$

24. अधोलिखितयोः कयोश्चिद् **द्वयोः** अलंकारयोः लक्षणोदाहरणे लिखत — $\frac{1}{2} + 1 + \frac{1}{2} + 1 = 3$

(i) उपमा

(ii) अर्थान्तरन्यासः

(iii) रूपकम् ।

25. अधोलिखितेषु पंक्तिषु अलंकारस्य नामोल्लेखं कुरुत — $1 + 1 + 1 = 3$

(i) मृदुलतान्तलतान्तमलोकयत् ।

(ii) गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ।

(iii) समानो मन्त्रः समितिः समानी ।